# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ | **प्रश्नपत्रम् – १** | गुणाः – १०० |
| विषयः – अनिवार्यसंस्कृतम् | ---- | समयः - ११ तः २ |
| दिनाङ्कः – १६/४/२०१६ | सन्दर्भग्रन्थः – किरातार्जुनीयम् – सर्ग १-२ | |

| | | |
|---|---|---|
| | **ख विभागः** | |
| **प्रश्नः -१** | **मल्लिनाथपद्धत्या केषाञ्चित् चतुर्णां श्लोकानां सप्रसङ्गं व्याख्यां लिखन्तु ।** | २० |
| | (१) श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।<br>स वर्णलिङ्गी विदितः समाययौ, युधिष्ठिरं द्वैतवने वनेचरः ॥<br>(२) क्रियासु युक्तैर्नृप ! चारचक्षुषो, न वञ्चनीयाः प्रभवोऽनुजीविभिः ।<br>अतोऽर्हसि क्षन्तुमसाधु साधु वा, हितं मनोहारि च दुलभं वचः ॥<br>(३) प्रलीनभूपालमपि स्थिरायति, प्रशासदावारिधि मण्डलं भुवः ।<br>स चिन्तयत्येव भियत्वदेष्यतीरहो दुरन्ता बल्वद्विरोधिता ॥<br>(४) इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।<br>विचिन्तयन्त्याः भवदापदं परां रुजन्ति चेतः प्रसभं ममा धयः ॥<br>(५) परिणामसुखे गरीयसि व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।<br>अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥<br>(६) किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ।<br>प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यथा ॥<br>(७) स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।<br>रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥<br>(८) सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।<br>वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ | |
| **प्रश्नः -२** | **अधोलिखितेभ्यः द्वयोः विमर्शं लिखन्तु ।** | १४ |
| | (१) समुन्नयन्भूतिमनार्यसङ्गमादूरं विरोधोऽपि सम महात्मभिः ।<br>(२) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।<br>(३) निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ।<br>(४) अभिभूतिभयादसूनुतः सुखमुज्झन्ति न धाम मानिनः । | |
| **प्रश्नः -३** | **कयोचिद् द्वयोः टिप्पणीं लिखन्तु ।** | ०८ |
| | (१) वनेचरस्य उक्तिः ।<br>(२) द्रौपद्याः पात्रालेखनम् ।<br>(३) युधिष्ठिरं प्रति भीमस्योक्तिः ।<br>(४) महाकविः भारविः । | |
| **प्रश्नः - ४** | किरातार्जुनीयस्य साहित्यस्वरूपं स्पष्टयन्तु ।<br>अथवा<br>किरातार्जुनीयम् (सर्गौ १,२) आधारिकृत्य भारवेः अर्थगौरवं समीक्षयन्तु । | ०८ |

***